# Paulastyaprokto Mangalya Stava

# પૌલસ્ત્યપ્રોક્તો મઙ્ગલ્યસ્તવઃ

## Document Information

Text title : Paulastyaprokto Mangalya Stava

File name : mangalyastavaHpaulastyaprokto.itx

Category : vishhnu, mangala

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 39

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# પૌલસ્ત્યપ્રોક્તો મઙ્ગલ્યસ્તવઃ

દાલ્ભ્ય ઉવાચ -
કાર્યારમ્ભેષુ સર્વેષુ દુઃસ્વપ્નેષુ ચ સત્તમ ।
અમઙ્ગલ્યેષુ સર્વેષુ યજ્જપ્તવ્યં તદુચ્યતામ્ ॥ ૧॥

યેનારમ્ભાશ્ચ સિદ્ધ્યન્તિ દુઃસ્વપ્નં ચોપશામ્યતિ ।
અમઙ્ગલાનાં સર્વેષાં પ્રતિઘાતશ્ચ જાયતે ॥ ૨॥

પુલસ્ત્ય ઉવાચ -
જનાર્દનં ભૂતપતિં જગદ્ગુરું સ્મરન્મનુષ્યઃ સતતં મહામુને ।
દુષ્ટાન્યશેષાણ્યપહન્તિ સાધયત્યશેષકાર્યાણિ તથા યદિચ્છતિ ॥ ૩॥

શ‍ૃણુષ્વ ચાન્યદ્વદતો મમાખિલં વદામિ યત્તે દ્વિજવર્ય મઙ્ગલમ્ ।
સર્વાર્થસિદ્ધિં પ્રદદાતિ યઃ સદા નિહન્ત્યશેષાણિ ચ પાતકાનિ ॥ ૪॥

પ્રતિષ્ઠિતં યત્ર જગચ્ચરાચરં જગચ્ચ યો યો જગતશ્ચ હેતુઃ ।
જગચ્ચ પાત્યત્તિ ચ યઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૫॥

વ્યોમામ્બુવાય્વગ્નિમહીસ્વરૂપૈર્વિસ્તારવાન્યોઽણુતરોઽણુભાગાત્ ।
સ સ્થૂલસૂક્ષ્મઃ સતતં સુરેશ્વરો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૬॥

યસ્માત્પરસ્તાત્પુરુષાદનન્તાદનાદિમધ્યાદખિલં ન કિઞ્ચિત્ ।
સ હેતુહેતુઃ પરમેશ્વરેશ્વરો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૭॥

હિરણ્યગર્ભાચ્યુતરુદ્રરૂપી સૃજત્યશેષં પરિપાતિ હન્તિ ।
ગુણાશ્રયી યો ભગવાન્સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૮॥

પરઃ સુરાણાં પરમોઽસુરાણાં પરો મુનીનાં પરમો યતીનામ્ ।
પરઃ સમસ્તસ્ય ચ યઃ સ દેવો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૯॥

ધ્યાતો યતીનામપકલ્મષૈર્યો દદાતિ મુક્તિં પરમેશ્વરેશ્વરઃ ।
મનોભિરાધ્યઃ પુરુષઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૦॥

સુરેન્દ્ર વૈવસ્વતવિત્તપામ્બુપસ્વરૂપરૂપી પરિપાતિ યો જગત્ ।
સ શુદ્ધસત્ત્વઃ પરમેશ્વરેશ્વરો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૧॥

યન્નામકીર્તનતો વિમુચ્યતે અનેકજન્માર્જિતપાપસઞ્ચયૈઃ ।
પાપેન્ધનાગ્નિઃ સ સદૈવ નિર્મલો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૨॥

યેનોદ્ધૃતેયં ધરણી રસાતલાદશેષસત્ત્વસ્થિતિકારણાદિદમ્ ।
બિભર્તિ વિશ્વં જગતઃ સ મૂલવાન્ મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૩॥

પાદેષુ વેદા જઠરે ચરાચરં રોમસ્વશેષા મુનયો મુખે મખાઃ ।
યસ્યેશ્વરેશસ્ય સ સર્વદા પ્રભુર્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૪॥

સમસ્તયજ્ઞાઙ્ગમયં વપુર્વિભોર્યસ્યાઙ્ગમીશેશ્વરસંસ્તુતસ્ય ।
વરાહરૂપો ભગવાન્સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૫॥

વિક્ષોભ્ય સર્વોદધિતોયસમ્પદં દધાર ધાત્રીં જગતશ્ચ યોદ્ભવઃ ।
યજ્ઞેશ્વરો યજ્ઞપુમાન્સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૬॥

પાતાલમૂલેશ્વરભોગિસંહતૌ વિન્યસ્ય પાદૌ પૃથિવીં ચ બિભ્રતઃ ।
યસ્યોપમાનં ન બભૂવ સોઽચ્યુતો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૭॥

વિઘર્ઘરં યસ્ય ચ બૃંહતો મુહુઃ સનન્દનાદ્યૈર્જનલોકસંસ્થિતૈઃ ।
શ્રુતં જયેત્યુક્તિપરૈઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૮॥

એકાર્ણવાદ્યસ્ય મહીયસો મહીમાદાય વેગેન સમુત્પતિષ્યતઃ ।
નુતં વપુર્યોગિવરૈઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૧૯॥

હતો હિરણ્યાક્ષમહાસુરઃ પુરા પુરાણપુંસા પરમેણ યેન ।
વરાહરૂપઃ સ પતિઃ પ્રજાપતેર્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૦॥

દંષ્ટ્રાકરાલં સુરભીતિનાશનં કૃત્વા વપુર્દિવ્યનૃસિંહરૂપિણમ્ ।
ત્રાતં જગદ્યેન સ સર્વદા પ્રભુર્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૧॥

દૈત્યેન્દ્ર વક્ષઃસ્થલદારદારુણૈઃ કરોરુહૈઃ શત્રુરુજાનુકારિભિઃ ।
ચિચ્છેદ લોકસ્ય ભયાનિ ચાવ્યયો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૨॥

દન્તાન્તદીપ્તિદ્યુતિનિર્મલાનિ ચકાર સર્વાણિ દિશં મુખાનિ ।
નિનાદવિત્રાસિતદાનવો હ્યસૌ મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૩॥

યન્નામસઙ્કીર્તનતો મહાભયાદ્વિમોક્ષમાપ્નોતિ ન સંશયં નરઃ ।
સમસ્તલોકાર્તિહરો નૃકેસરી મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૪॥

સટાકલાપભ્રમણાનિલાહતાઃ સ્ફુટન્તિ યસ્યામ્બુધરાઃ સમન્તતઃ ।
સ દિવ્યસિંહઃ સ્ફુરિતાકુલેક્ષણો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૫॥

યદીક્ષણજ્યોતિષિ રશ્મિમણ્ડલં પ્રલીનમેવ ન રરાજ ભાસ્વતઃ ।
કુતઃ શશાઙ્કસ્ય સ સિંહરૂપધૃઙ્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૬॥

દ્રવન્તિ દૈત્યાઃ પ્રણમન્તિ દેવતા નશ્યન્તિ રક્ષાંસ્યપયાન્તિ ચારયઃ ।
યત્કીર્તનાત્સોઽદ્ભુતરૂપકેસરી મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૭॥

અશેષદેવેશનરેશ્વરેશ્વરૈઃ સદા સ્તુતં યચ્ચરિતં મહાદ્ભુતમ્ ।
સ સર્વલોકાર્તિહરો મહાહરિર્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૮॥

ઋક્કારિતં યો યજુષાતિશાન્તિમત્સામધ્વનિધ્વસ્તસમસ્તપાતકમ્ ।
ચક્રે જગદ્ધામનકઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૨૯॥

યત્પાદવિન્યાસપવિત્રતાં મહી યયૌ વિયદ્દૃગ્યજુષામુદીરણાત્ ।
સ વામનો દિવ્યશરીરધૃક્ સદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૦॥

યસ્મિન્પ્રયાતે સુરભૂભૃતોઽધ્વરં નનામ ખેદાદવનિઃ સસાગરા ।
સ વામનઃ સર્વજગન્મયઃ સદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૧॥

મહાદ્યુતૌ દૈત્યપતેર્મહાધ્વરં યસ્મિન્પ્રવિષ્ટે ક્ષુભિતં મહાસુરૈઃ ।
સ વામનોઽન્તસ્થિતસપ્તલોકધૃઙ્મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૨॥

સમસ્તદેવેષ્ટિમયં મહાદ્યુતિર્દધાર યો રૂપમતીન્દ્રિયં પ્રભુઃ ।
ત્રિવિક્રમાક્રાન્તજગત્ત્રયઃ સદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૩॥

સઙ્ઘૈઃ સુરાણાં દિવિ ભૂતલે સ્થિતૈસ્તથા મનુષ્યૈર્ગગને સ સર્વદા ।
સ્તુતઃ ક્રમાદ્યઃ પ્રદદે સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૪॥

ક્રાન્ત્વા ધરિત્રીં ગગનં તથા દિવં મરુત્પતેર્યઃ પ્રદદૌ ત્રિવિષ્ટપમ્ ।
સ દેવદેવો ભુવનેશ્વરેશ્વરો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૫॥

અનુગ્રહં ચાપિ બલેરનુત્તમં ચકાર યશ્ચેન્દ્રપદોપલક્ષણમ્ ।
સુરાંશ્ચ યજ્ઞસ્ય ભુજઃ સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૬॥

રસાતલાદ્યેન પુરા સમાહૃતાઃ સમસ્તવેદા વરવાજિરૂપિણા ।
સ કૈટભારિર્મધુસૂદનો મહાન્ મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૭॥

નિઃક્ષત્રિયાં યશ્ચ ચકાર મેદિનીમનેકશો બાહુવનં તથાછિનત્ ।

યઃ કાર્તવીર્યસ્ય સ ભાર્ગવોત્તમો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૮॥

નિહત્ય વાલિં ચ કપીશ્વરં હિ યો નિબધ્ય સેતું જલધૌ દશાનનમ્ ।
જઘાન ચાન્યાન્રજનીચરાનસૌ મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૩૯॥

ચિક્ષેપ બાલઃ શકટં બભઞ્જ યો યમલાર્જુનૌ કંસમરિં જઘાન ।
મમર્દ ચાણૂરમુખં સ સર્વદા મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૦॥

પ્રાતઃ સહસ્રાંશુમરીચિનિર્મલં કરેણ બિભ્રદ્ભગવાન્સુદર્શનમ્ ।
કૌમોદકીં ચાપિ ગદામનુત્તમાં મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૧॥

હિમેન્દુકુન્દસ્ફટિકાભ્રકોમલં મુખાનિલાપૂરિતમીશ્વરેશ્વરઃ ।
મધ્યાહ્નકાલે ચ સ શઙ્ખમુત્તમં મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૨॥

તથાપરાહ્ણે પ્રવિકાસિપઙ્કજં વક્ષઃસ્થલેન શ્રિયમુદ્વહદ્વિભુઃ ।
વિસ્તારિપદ્મોત્પલપત્રલોચનો મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૩॥

સર્વેષુ કાલેષુ સમસ્તદેશેષ્વશેષકાર્યેષુ તથેશ્વરેશ્વરઃ ।
સર્વૈઃ સ્વરૂપૈર્ભગવાનનાદિમાન્ મમાસ્તુ મઙ્ગલ્યવિવૃદ્ધયે હરિઃ ॥ ૪૪॥

ફલશ્રુતિઃ -
એતત્પઠન્દાલ્ભ્ય સમસ્તપાપૈર્વિમુચ્યતે વિષ્ણુપરો મનુષ્યઃ ।
સિધ્યન્તિ કાર્યાણિ તથાસ્ય સર્વાણ્યર્થાનવાપ્નોતિ તથા યથેષ્ટમ્ ॥ ૪૫॥

દુઃસ્વપ્નં પ્રશમમુપૈતિ પઠ્યમાને સ્તોત્રેઽસ્મિન્ શ્રવણવિધૌ સદોત્થિતસ્ય ।
પ્રારમ્ભો દ્રુતમુપયાતિ સિદ્ધિમીશઃ પાપાનિ ક્ષપયતિ ચાસ્ય વાસુદેવઃ ॥ ૪૬॥

મઙ્ગલ્યં પરમમિદં સદાર્થસિદ્ધિં
નિર્વિઘ્નં ત્વધિકફલં સદા દદાતિ ।
કિં લોકે તદિહ પરત્ર ચાસ્તિ પુંસાં
યદ્વિષ્ણુપ્રવણધિયા ન દાલ્ભ્ય સાધ્યમ્ ॥ ૪૭॥

દેવેન્દ્રસ્ત્રિભુવનમર્થમેકપિઙ્ગઃ સર્વર્દ્ધિં ત્રિભુવનગાં ચ કાર્તવીર્યઃ ।
વૈદેહઃ પરમપદં પ્રસાદ્ય વિષ્ણું સમ્પ્રાપ્તઃ સકલફલપ્રદો હિ વિષ્ણુઃ ॥ ૪૮॥

સર્વારમ્ભેષુ દાલ્ભ્યૈતદ્દુઃસ્વપ્નેષુ ચ પણ્ડિતઃ ।
જપેદેકમતિર્વિષ્ણૌ તથામઙ્ગલ્યદર્શને ॥ ૪૯॥

શમં પ્રયાન્તિ દુષ્ટાનિ ગ્રહપીડાશ્ચ દારુણાઃ ।
કર્મારમ્ભાશ્ચ સિધ્યન્તિ પુણ્યમાપ્નોતિ ચોત્તમમ્ ॥ ૫૦॥

હરિર્દદાતિ ભદ્રાણિ મઙ્ગલ્યસ્તુતિસંસ્તુતઃ ।
કરોત્યખિલરૂપૈશ્ચ રક્ષામક્ષતશક્તિધૃક્ ॥ ૫૧॥

ઇતિ વિષ્ણુધર્મેષુ એકોનચત્વારિંશોઽધ્યાયાન્તર્ગતઃ
પૌલસ્ત્યપ્રોક્તો મઙ્ગલ્યસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Paulastyaprokto Mangalya Stava*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*